श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीकूरनाथश्रीवत्सचिह्नमिश्र विरचितम्

# ॥ श्री यतिराज प्रार्थनापञ्चकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Dr. Sri. R. Thirunarayanan of Srirangam and Ms. A. Divya of Melukote for their help in the preparation of this document.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री यतिराज प्रार्थनापञ्चकम् ॥

यतीश्वर! शृणु श्रीमन्! कृपया परया तव।
मम विज्ञापनमिदं विलोक्य वरदं गुरुम्॥ १॥

अनादिपापरचिताम् अन्तःकरणनिष्ठिताम्।
यतीन्द्रविषये सान्द्रां विनिर्वासय वासनाम्॥ २॥

अपि प्रार्थयमानानां पुत्रक्षेत्रादिसम्पदाम्।
कुरु वैराग्यमेवात्र हितकारिन् यतीन्द्र! नः॥ ३॥

यथाऽपराधा न स्युर्मे भक्तेषु भगवत्यपि।
तथा लक्ष्मणयोगीन्द्र! यावद्देहं प्रवर्तय॥ ४॥

आमोक्षं लक्ष्मणार्य! त्वत्प्रबन्धपरिशीलनैः।
कालक्षेपोऽस्तु नस्सद्भिः सहवासमुपेयुषाम्॥ ५॥

पराङ्कुशमुनीन्द्रादिपरमाचार्यसूक्तयः।
स्वदन्तां मम जिह्वायै स्वत एव यतीश्वर!॥ ६॥

इत्येतत् सादरं विद्वान् प्रार्थनापञ्चकं पठन्।
प्राप्नुयात् परमां भक्तिं यतिराजपदाब्जयोः॥ ७॥

काषायशोभिकमनीयशिखानिवीतं
    दण्डत्रयोज्वलकरं विमलोपवीतम्।
उद्यद्दिनेशनिभमुल्लसदूर्ध्वपुण्ड्रं
    रूपं तवास्तु यतिराज! दृशो ममाग्रे॥ ८॥

न चेद्रामानुजेत्येषा चतुरा चतुरक्षरी।
कामवस्थां प्रपद्यन्ते जन्तवो हन्त मादृशाः॥ ९॥

www.prapatti.com

पुण्याम्भोजविकासाय पापध्वान्तक्षयाय च।
श्रीमानाविरभूद्भूमौ रामानुजदिवाकरः॥ १० ॥

तृणीकृतविरिञ्चादिनिरङ्कुशविभूतयः।
रामानुजपदाम्भोजसमाश्रयणशालिनः॥ ११ ॥

॥ इति श्री यतिराज प्रार्थनापञ्चकं समाप्तम्॥

www.prapatti.com